Shodh Sangam Patrika
ISSN: 3049-0707 Volume 2 | Issue 1 | (Jan – Mar 2025)

# पुराणे प्रकृति वृक्षमिति जीवनस्य आधार

**Dr. Arnnada Shankar Acharya**
Department Of Sanskrit, Lecturer in Sanskrit, B. B. College,
Baiganbadia, Mayurbhanj, Odisha

**शोधसारः –**

धरित्री मध्ये जीवन सञ्चरणात् पूर्वं तरुणाम् जन्म अभवत्। सम्पुर्ण ब्रह्माण्डस्य मुल्यवान पदार्थमध्यात् वृक्षमिति सर्वोपरि भवति। व्रह्माण्ड मध्ये वहव ग्रहा नक्षत्राञ्च सन्ति तेषां मध्यात् सम्यक् केचनमात्र ग्रहा वासोपोयोगी वर्तते। पृथिवीवत् सर्वे स्वर्णिम मण्डलं मध्ये न सन्ति तथा च न हि तत्र अन्य जीवनं सञ्चारणं प्रमाणमपि वर्तते। पृथिवी एकस्मिन् दुर्लभ निवास स्थान भवति यत्र जीवनस्य सञ्चरण तथा वासोपयोगी अनुकुल पर्यावरणं वर्तते। अत्र प्रत्येक जीव परस्पर चतुर्पार्श्वे आदिम कालात् सुखेन परिवर्धते। विज्ञान मते पुराकाले डाइनोसर् नामक जीव पृथिवीपृष्ठे अभवत्। यदा तस्य सामुहिक जीवनम् एक उल्कापिण्ड माध्यमेन विनाशं भवति तदा स्तन्यपायी प्राणीनां अभ्युदयं वर्तते। तत्पर आदि युगात् अद्यावधि पर्यन्त विश्वस्य श्रेष्ठ जीवरुपे मनुष्यमिति परिचयं लभ्यते। वहव सभ्यता युगानि च व्यतितानि वर्तन्ते किन्तु मानवा इतिहासात् सम्यगमपि शिक्षा न प्राप्नुवन्त। सिन्धु सभ्यतायां प्रत्यक्ष अनुभुत्या परं सम्प्रति मानवा विज्ञानस्य जययात्रा विकासस्य चरम उत्कर्षता लभ्यते तथा स्वस्वार्थं निमित्त वन्य, पशु, परिवेश इत्यादय ध्वसं लीला कृत्वा विकाश पथे अग्रसरति। पुराकाले जनाः प्रकृत्या उपरि निर्भर कृत्वा स्वजीवनम् निर्वाहं अकरोत्। सिन्धु सभ्यतायां अधपतन परं जीवनस्य अभिवृद्धि निमित्त अन्य एक सनन्द मनुष्याणां प्राप्नुवन्त। अभिनव कारीगरी कौशलं माध्यमेन योजनावद्धा मनुष्य स्वनिमित्त वासगृह, सुन्दर प्रासाद, जलं निष्कासनं निमित्त जलनिष्कासनं मार्ग यत् सर्वं नद्या मध्ये प्रविष्टवन्त।

तत् परं मनुष्याणा वन्धनम् चिन्ता भवति। इत्यस्मिन् अवसरे परिवार मध्ये जन्म, विवाह तथा अन्य आकर्षणिय जीवनशैल्या मध्ये निमग्ना मनुष्या आनन्द सागरे मोहयित्या प्रकृत्या विनाशं आरम्भ्यन्ते। वृक्षाणां विनाशं कृत्वा शान्त स्निग्ध वातावरणयो असन्तुलितवन्त तथा स्व विनाश निमित्तं मार्गं प्रस्तरिर्यते यत् सुनामि, असमये घुर्णिवलय, चक्रवात, वात्या, वन्या, वैशिक तापमात्रा वृद्धि इत्यादयस्य मुल कारणं भवति। वृक्ष इति जीवनस्य मुल आधारशिला वर्तते। यदा वृक्षं न वर्त्तते तदा जीवनम् अपि न भवति।

**प्रमुखशब्दाः –** वृक्ष, पुराण, प्रकृति सम्वेदनशीलता, आयुर्वेद, वृक्षायुर्वेद

**प्रस्तावना –**

परितः आवृणोति इति पर्यावरणम् अनया वुत्पत्याः पर्यावरण शब्दो निष्पद्यते। मनुष्यः यत्रापि निवसति, क्रिड़ति, खादति, वस्त्राणि धरयति, वायु ग्रहणं करोति इत्यदय सर्वेषामपि पर्यावरणे निलियते। पर्यावरणम् एतत् अस्मत् प्रकृत्या प्रदत्तं वर्तते। यत् अस्माकम् सर्वेषां प्राणतत्त्वस्य रक्षां करोति। सर्वेषां प्राणिनां विकाशाय अस्य पर्यावरणस्य पवित्रता आवश्यकीयम् भवति। यतो हि स्वस्थं पर्यावरणं अस्माकं सर्वेषा जीवनस्य आधारः भवति। सर्वे हरिताः वृक्षा लताश्च अक्सीजनं नामक प्राणवायु प्रदत्वा पर्यावरणस्य शुद्धिं कुर्वन्ति। ते खलु मानवैः वायुमण्डले परित्यक्तानि सर्वाणि दुषणानि उदरस्थाः कुर्वन्ति। यतो हि एते वृक्षाः कार्बनडाईअक्साइड नामक गम्भिर तत्वं वायुतः गृह्यन्ति अक्सीजेनं नामक तत्वं विसृजन्ति। अनेन प्रकारेण अस्माकं पर्यावरणं स्स्थं भवति। अस्मिन् संसारे ये प्राणिनः सन्ति सर्वे अपि ते अस्माकं पर्यावरणे सन्तुलनं स्थापयतुं भगवता निर्मिताः किन्तु अद्यत्वे मानवैः स्वसुखाय अनेकाः आविष्काराः कृत्वाः विद्यन्ते तैः पर्यावरणम् अस्माकं प्रदुषितं क्रयते। यथा सम्प्रति तैलचलितानि यानानि स्वकीयैः धुमैः स्वस्थमपि वायुमण्डलम् अत्यधिकं

प्रदुष्यन्ति। अतः अस्माकं वायुमण्डले प्रतिक्षणं प्रदुषणं वर्धते। वनानि विच्छिद्य मानवः स्वगृहनिर्माणं करोति ।अतः वृक्षाणाम् अभावे वातावरणम् अस्माकं दुषितं भवति। विभिन्न अस्त्राणाम् परिक्षणैः समुद्रस्य वातावरणं पिरदुष्यते।

वस्तुतः मानवाः स्वस्य अल्पलाभाय अज्ञानवशात् स्वकीयं विनाशं कुर्वन्ति। वनप्राणिनां स्वमनो विनोदाय अथवा धनं लाभाय हिंसा तथा अनावस्यकतया व्याप्याद्यन्ति। अनेन प्रकारेण जले, स्थले, वने, गगने अन्तरिक्षे च सर्वत्रैव प्रदुषणं परिवर्धयते ।

**वृक्ष –**

ग्रीष्मस्य ललाटन्नपमातप शमनं जाज्वल्वमानरजप्रसर उपसमयन् तप्त पर्वतकुलम् उदाम दावाग्नि विधुराणि काननानि च समाश्वासयन्। निदाघ दाह दग्धान् पशु पक्षिणा अन्याश्च स्थावरजंगमान् सकलान् मृतकल्पान् जीवान् स्वकीय अभिमानार्भिवारिधाराभिरूज्जीवयश्च जलद पटल रमणीयो यदा वर्षा समागत। वर्षा एषः उपजीवनम् तथा जीविका जीवनम् सकाशं जीवनदायी वर्तते। यदा सूर्य तापनं तप्वा नदीषु तडागेषु वा शुष्यति अस्मिन् वर्षा तदा पुनः मेघैः परिपूर्यते। सर्वत्र हरीतिमा प्रसरति। वर्षा प्रभावेण समग्र जलाशया पुनः परिपूर्णाः जायन्ते। प्रकृत्याः स्वरुपं अतीव मनोहारि तथा रमणीयञ्च भवति। वनवाताः शीतल जलकणैः संयुक्ताः सुरभित पल्लविताः भवन्ति। वृक्षाणां निमित्तं वर्षा भवति। यदि वृक्षा पृथिव्या न भवन्ति तर्हि वर्षा तत् मध्यात् विभिन्न खणिजलवण, तथा अत्यावश्यक सामग्री यत् प्राणीनां जीवनम् निमित्त आवश्यकीयम् तद् अपि न प्राप्यन्ते। वृक्षाः निमित्त वर्षाः एवं वर्षा निमित्त अस्यां पृथिव्यां जीवानां आधारः वर्तते। अनेन विना प्राणिनः जीवितुं न शक्नुवन्ति। वैदिक साहित्ये अपि विषये अस्मिन् प्रार्थना कृता विद्यते यथा–

“ निकामे निकामे नः पर्जन्यः वर्षतु ।
फलवत्यो न ओषधयः पच्यताम् ।। ”

**पुराण–**

वेद चतुर्भागेन विभक्ता यथा संहिता, व्राह्मण, आरण्यक उपनिषद च। वेदस्य एकस्मिन् भाग आरण्कमिति केवल वृक्ष निमित्त वर्त्तते। आर्यावर्त्ते तथा भारतवर्षे मुनि ऋषिणां आश्रयस्थलमिति अरण्य। अरण्य सम्पदा हि तेषां जीवन जीविकायां प्रधान सम्वलमिति वर्तते। अरण्यस्य शान्त वातावरणे यत् शास्त्राणां अध्यापन अध्ययनं च वर्तते तत् इति आरण्यक कथ्यते। अतः भारतवर्षस्य वनानि वृक्षसम्पदा अन्यनाम तपोवनम्। आचार्य सायण मते –

“ अरण्याध्यना देतद् आरण्यकम् इति अवतीर्यते ।
अरण्ये तदधीयेते त्येवं वाक्यं प्रवक्षते ।। ”
अपि च ऋगवेदे ऐतरेय आरण्यक अपि उद्घोषयति यत-
“ सर्वाऋचः सर्वेवेदाः, सर्वेघोषाः एकैव व्याहृतिः प्राण एव प्राण ऋच इत्येव विद्यत् ”

रामायणे मध्य अरण्य काण्ड अस्ति। महाभारते मध्य वन पर्व तथा अरण्य पर्व अस्ति। महाभारते आदिपर्वे वर्णितमस्ति यत् –

“ आरण्यकञ्च वेदेभ्य ओषधिभ्यो अमृतं यथा ”

तथाच –

“ वर्षमावपतां श्रेष्ठं वीजं निवपतां वरम् ।
गावः प्रतिष्ठमानानां पुत्रः प्रसवता वरः ।। ”

अपिच –

“ पुत्र आत्मा मनुष्यस्य भार्या दैवकृतः सखा ।
उपजीवनं च पर्जन्यो दासमस्य परायणम् ।। ”

ततपरवर्ति समय यत् इति पुराण युग वर्तते तत्रपि वृक्षरोपणस्य विभिन्न उपकार वर्णितम् अस्ति। पद्मपुराणे वृक्षरोपणं नाम अध्याये लिखितम् यत् –

“ अपुत्रस्य च पुत्रत्वं पादपा इह कुर्वते ।
यत्नेनापि च राजेन्द्र ! अश्वत्थारोपणं कुरु ।।
स ते पुत्र सहस्राणां कार्यमेकः करिष्यति ।
धनी चाश्वत्थवृक्षेण अशोकः शोकनाशनः ।।
प्लक्षो यज्ञप्रदः प्रोक्तो निम्वश्चासुप्रदः स्मृतः ।
जम्वुको नाकदा प्रोक्ता भार्यदा दाड़िमो तथा ।
डुम्वरो रोगनाशाय पलाशो व्रह्मदस्तथा ।। ”

वृक्ष विनाशात् वारणार्थे वह्नि पुराणे तडागवृक्ष प्रशंसा अध्याये वर्णितम् यत् इति –

“ पुत्रवत् परिपाल्याश्च ते पुत्राः धर्मतः स्मृताः ।
किं धर्मविमुखैर्मर्त्यैः केवलं स्वार्थहेतुभिः ।।
तरुपुत्रा वरं ये तु परार्थैकानुवृत्तयः ।
पत्रपुष्पफलंछायामूलवल्कलदारुभिः ।
पूजयेन्त्येव तरवो मुनिवद् द्वेषवर्जिताः ।। ”

वृक्षरोपणं एक पुण्यप्रद कार्य इति वाराह पुराणे गोकर्णमहात्म्य नाम अध्याये अपि उक्तंच –

“ भुमिदानेन ये लोका गोदानेन च कीर्त्तिताः ।
ते लोकाः प्राप्यते पुंभिः पादपानां प्ररोहणे ।। ”

स्वपुत्रापेक्षा एक तरुपुत्र श्रेयस्करं भवति। “ परोपकार सतां विभुतयः ” इति शिक्षा वयं सर्वे वृक्षात् शिक्षणीय।

**प्रकृति सम्वेदनशीलता –**

प्रकृति चिर शाश्वत। प्रकृतिं इति मधुरा। प्रकृति उपभोग्या। सा यादृशि वैचित्रमयि तादृशि सम्वेदनशिला तथा रहस्यमयि च अपि। ऋतुचक्रे प्राकृतिक विवर्त्तन मानव जगते एक नित्य नैमितिक लीला भवति। प्राकृतिक रंगशालायां एतद् लीलायाम् अन्त न दृशते। अपितु एतद् दृश्य दर्शनं परं ये केचित् सहजभावेण इत्यस्मिन् प्रेमजालेन आवद्धा प्रकृति रुपे मोहितवन्त। ऋतु विशोधित प्रकृति। षड़ऋतुमध्यात् अग्रजभावेण ग्रीष्मऋतु स्व रौद्रतापे यद्यपि जना सन्तापित तथापि च्युत, पनष, पपि, द्राक्षाफलम्, नाशपाति, रम्भाफलम्, जम्बुफलम् इत्यादय फलानि समाहारेण जना आमोदितामपि च। परवर्त्ति समये पुनः वर्षाकाल यदा आरम्भ्यते तदा मनुष्य आनन्देन अधिरा तस्या स्वागतमपि कारिष्यन्ति। पुनः प्रकृति हरित वर्णे सुशोभिता रमणीया दृशन्ते। तस्यपरवर्ति समये वाहु छन्दित्वा अन्य भ्रातर भग्न्याश्च यथा शरतः, हेमन्तः, शीत तथा वसन्तमपि आगछति। यस्या स्वागत सदा सर्वदा विभिन्न पर्व तथा उत्सव माध्यमेन भवति नगरा, पुर, पल्लि सर्वै आमोदिता प्रमोदिता च। उषायाम् काले च्युत कुंजे पिक ध्वनि, सन्ध्याकाले विभिन्न पक्षिण कलरव, कल कल निनादित निर्झरिणि, शान्त नदी वात, वेत्र कुंज, चातकस्य ध्वनि, विभिन्न अपरुप वन्य जन्तवः तथा सुगन्धिता वन्य औषधयः, गुल्म, विभिन्न प्राकृतिक सम्पदा सर्वदा मनोहरा स्वर्गीय आनन्दं प्रदेयन्ति। प्रकृति प्राणी उभय परस्पर अत्यन्त निविड़तया लग्न। अस्य स्थिति, वर्धन तथा व्यवहार विभिन्नभावे भिन्न भिन्न रुपेण जड़ित। अस्य सम्बन्धस्य जटिलता प्राणीजगते सम्यग् भिन्न परिदृश्यते। प्राणीमात्रेण गठनभेदे अत्यन्त जटिल, तस्य शारीरिक गठनप्रक्रिया, वर्धनप्रक्रिया एवं

जीवनस्य विकाश वृक्षाणां तथा अन्य प्राकृतिक पदार्थानां सह वहुधा सम्पर्कशील यत् विना जीवस्य जीवन क्रमविकाश इत्यादय न सम्भवति। अन्य दिशायां पुनः शारीरिक शक्तिपरम्परा एवं उपादानादिनां अपि अत्यन्त जटिल रुपेण सम्पृक्त। एतद्भिन्न अवस्थानभेदेनमपि अन्य प्राणीनां सह सम्वन्ध तथा स्वस्य विकाश विवर्धनं च निमित्तं वृक्ष, लता, परिवेश, वातावरणं इत्यादय उपादानानि अपि संलग्नं भवन्ति। यद्यपि प्राणीनां एवं प्रकृति अस्य एतद् नैसर्गीक सम्बन्धशीलता उछित्वा तस्य कृतिम स्बन्धशीलता अनुध्यानं कर्तुं तर्हि दृश्यते यत् प्रकृति सह मानवानां वहव उद्देश्य साधयेत् यथा – कृषक गोमहिषादिनां कृषिकर्मे नियोजितम्, गोपाल गो दोहनम्, अश्व, हस्ति, श्वान इत्यादय मनुष्याणां सह सहभागिता कुर्म। खाद्यश्रृखला अपि परस्पर उपरि निर्भरशील वर्तते। प्रकृति एवं जीवन उभय परश्पर एक अविछिन्न रज्जु माध्यमेन आवद्धा। अतः चिन्तनीय कर्तव्य चेत् अपि प्रकृत्या यदि केनोपि क्षति वर्तते तर्हि जीवनं प्रति विपदं जायते। वृक्ष इति जीवनं कारणं वृक्ष विना अम्लजान् वायु प्राप्ति कष्टकर यत् निमित्त ग्रहान्तर निवास अपि असम्भव जायते। अतएव अन्य गृहे निवास इछा किं कारणं यदि स्वगृहं वर्तते। स्वगृह यदि परिष्कार कृत्वा वयं सर्वे निवास तर्हि प्रवासं आवश्यकतायां अस्ति वा ? सुतरां अस्माकम् प्रिय गृह पृथिवी तथा प्रकृतिं सह वयं सर्वे न्यायोचित व्यवहार कर्तव्या तर्हि सर्वेषां सुरक्षिता, सुन्दरतया जीवनं प्राप्तवान्।

**आयुर्वेद –**

आयुर्वेद सह प्राणी एवं वृक्ष उभय अंगाङ्गि भावेन जड़ित। आयुर्स्मिन् विद्यते इत्यायुर्वेदः, आयुर्विद्यते ज्ञायते अनेनेति आयुर्वेदः, आयुर्वेदयति इति आयुर्वेदः। चरक संहितायां प्रोक्तं च –

" हिताहितं सुखं दुःखमायुस्तस्य हिताहितम् ।
मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते ।।
शरीरेन्द्रियसत्वात्मसंयोगे धारि जीवितम् ।
नित्यगश्च अनुवन्धश्च पर्यायैरायु उच्यते ।। "

चरकसंहितानुसारं हितकर, अहितकर, सुखकर, दुःखकर इति चत्वारि प्रकारा आयु भवति। आयुर्वेद ऋग्वेदस्य उपवेद इति वर्तते। य स्वयमेव स्वस्य प्राचीनता उद्घोषयति। आयु नाम शरीर, इन्द्रिय, मन तथा आत्मनः सयोगमिति उच्यते। आयुर्वेद अध्ययनं निमित्तं वहव ग्रन्था वर्तते उपलभ्यते परन्तु चरक संहिता एवं सुश्रृत संहिता सर्वोपरि वर्तते। तत्र अरण्य, वृक्ष, गुल्म, विभिन्न मूल इत्यादय विषये विस्तृततया विचार्यते। आयुर्वेद एवं वृक्ष उभय परिपुरक वर्तते। अद्यावधिमपि विभिन्न औषध प्रस्तुत निमित्तं वृक्षस्य आवश्यकतायामस्ति। सम्प्रतिमपि हिमालये अतिगुह्यतरं गुल्म तथा दुर्लभ वृक्षानि प्राप्यन्ते यत वहव जटिलतर रोगाणां परिशमनं निमित्तं भवति यथा – वनककरिः (Podophyllum hexandrum), राखाल व विरमि व तुना (Taxus wallichiana), पतिशः(Aconitum hecterophyllum), रोवुस्ता (Pinus roxburghii) इत्यादयः।

**वृक्षायुर्वेदः –**

वृक्षस्य आयुः अनेन वेत्ति इति। इत्यस्मिन् ' तरुचिकित्साशास्त्र ' अपि कथ्यते। वृक्षस्तु स्थावरयोनि विशेषः। विभिन्न कोशे वृक्षस्य पर्यायवाचि वहव अपि शव्दं च परिलक्षते यथा –

क – महीरुहः, शाखी, विटपः, पादपः, तरुः, अनेकोहः, कुटः, सालः, पलाशः, द्रु, द्रुमः, आगमः इति अमरकोशे ।
ख – विष्टरः, महीरुहः, स्थिरः, कारस्करः, नगः, अगः, कुटारः इति शब्दरत्नावल्या ।
ग – विटपः, कुजः, वनस्पतिः, अद्रिः, शिखरः, कुञ्जः, क्षतिरुह, अघ्रिपः, भूरुहः, भूजः, महोजः इति घण्टाधरे ।
घ – धरणीरुहः, क्षितिज, शालः इति राजनिर्घण्टुग्रन्थे ।

हेमचन्द्रानुसारं वृक्षस्य अनेक भेद वर्तते यत् मध्यात् अग्रवीजा, मुलजा, पूर्वयोनयः, स्कन्दजा, वीजरुहाः, संवरजाः मुख्या वर्तते। वहुपुरा कालात् जीवजगत सह वृक्षस्य सहवास इति परिलक्षते। वृक्ष इति प्राणीजगतस्य विशेषतः मनुष्याणां पुरातन प्रियवयस्य भवति स्म। वैदिक कालात् आरभ्य वृक्षपूजा प्रचलित। न केवलं भारतवर्षे अपितु विश्वस्य अन्य राष्ट्रे अपि वृक्षाणां पूजा परिलक्षते। वहुल रुपेण अस्वस्थ, वेल, देवदारु, लिम्व, तुलसि प्रभृतिनां वृक्ष पूजा संघटिता वभुव। एतद् विषये डः. पूर्णचन्द्र ओझा महाशयेन " Aswatha in everyday life as related in purans " published by sundeep prakashan, Delhi ग्रन्थे विस्तृत रुपेण आलोचित। श्रीमद्भगवत्गीतायाम् पञ्चदशतम अध्याये अश्वस्थ वृक्षस्य दार्शनिक तथा आध्यात्मिक द्दष्टा व्याख्या द्दश्यते। रामायणे अपि वृक्षाणां सुन्दर वर्णनं उपलक्षते। प्राणी जगत्या निमित्तं वृक्षाणां वैज्ञानिकि आवश्यकता स्त। वहुपुरातन काले विभिन्न शास्त्रे उल्लिखितं यत् –

" श्वसन्तश्चोछसन्तश्च शुद्धिकुर्वन्त्यर्हनिशम् ।
विहायसं विनायासं वृक्षान्स्तानभिवादये ।।
प्रपूरयन्तो वियतं सततं प्राणवायुना ।
तारयन्ति जगत्सर्वं तदेते तरवो मताः ।।
छिन्नानामपि वृक्षाणां लुब्धैः स्वार्थपराणैः ।
वर्धनं द्विगुणं भूयस्तद्धिताय हितैषिणाम् ।। "

अर्थात् हे मानवा ! श्वास निःश्वास च माध्यमेन परिवेश तथा वायुमण्डलं विशुधयति वृक्षाणां सर्वदा वन्दयमान अभिवादयश्च। एतस्मिन् भावेन प्राणवायु समग्र वायुमण्डलात् विस्तृत्य तथा परिपुर्णतया समस्त जीवजगतयो उद्धारं करिष्यति। तारयन्ति जगत् सर्वं इति तरवः। पुनः वृक्षहन्तार स्वार्थी लोभासक्त मानवै निमित्तं एतद् हितैषि वृक्ष पुनः स्वयंमेव वहुगुणित रुपे पल्लविता तथा विकशित अभवत् च। सम्प्रति परिवेशस्य सुरक्षा निमित्त सर्वे अपि चिन्तित। समग्र विश्व परिवेशस्य सन्तुलनम् रक्षा निमित्तं वृक्षस्य महत्वपुर्ण योगदानात् अस्विकार कर्तुं न शक्यते। प्राणीनां जीवन धारणं सकाशं आवश्यकीय अम्लजान् वायु वृक्ष हि प्रदियन्ते तथा अनावश्यक वायु अंगारकाम्ल वायु स्वयं ग्रहित्वा वायुमण्डलं प्रदुषित्या रक्षा कारयति। सम्प्रति विपुल परिमाणेन वृक्षछेदन फलेन वायुमण्डलं प्रदुष्यणं जायते। एतद् दुषित वायु हि विभिन्न दुरारोग्य व्याधिनां जनक वर्तते। एतद् अस्य निराकरण निमित्त वहव वृक्षाणां आवश्यकं भवति। भुमिगत जलस्तरस्य स्थिरता निमित्तं वृक्षाणां अवदानम् वर्तते। अन्यथा समग्र पृथिवी मरुस्थल रुपेण परिवर्तितं जायते। अतः सर्वे अपि एतद् गुरु गम्भिर विषये चिन्तनीय आवश्यकता वर्तते नोचेत् समय जटिलतरं यदा भुयते तदा अस्माकम् हस्ते किञ्चिदपि कर्तुं न शक्यताम्। जीवन धारणं निमित्त याद्दशी जलं आवश्यकतां अस्ति ताद्दशी प्राणीजगतानां अपि विनाश मुखात् सुरक्षा प्रदानं निमित्त अरण्यानि आवश्यकतां अस्ति कारणं वृक्ष इति प्रत्यक्षे प्राणवायु रुपक अम्लजान् उद्गीरयन्ते एवं परोक्षे जलं संरक्षित कुर्वन्ति। वृक्षस्य अभावात् वायुमण्डले घन उत्ताप वृद्धि जायते। अंशुघातात् जनमानस समुह विनाशं लभ्यन्ते। यथासमये ऋतुचक्र परिचालित न भवति। प्राकृतिक दुर्विपाक महावात्या, सुनामि इत्यादय माध्यमेन जनमानस विनाशं भवति। मृत्तिका संरक्षण अभावात् मृत्तिकाक्षयं जायते। अतः सर्वोपरि प्रथमतया वृक्षाणां रक्षणाय जीवन रक्षण सम्भवं भवति।

संस्कृत साहित्ये प्रायतः समस्त शास्त्रे वृक्षस्य उपयोगिता विषये सम्यगतया आलोचितं अस्ति। तत्र वृक्षाणां संरक्षणं निमित्त विविध विधि वर्णितं अस्ति। अथर्ववेदे मनुष्याणां शरीर रक्षा निमित्त विधान उल्लिखितम् अस्ति। व्रह्मवैवर्त्त पुराणे आयुर्वेदं इति पञ्चमवेदं स्विक्रियते। अस्य आयुर्वेदे वृक्ष वनष्पतिणां विषये वहव वर्णनं द्दश्यते। मनुस्मृत्या यत् कथ्यते –

" याद्दशं तृप्यते वीजं क्षेतेरे कालोपपादिते ।
ताद्दग्रोहति तत्तस्मिन् वीजं स्वैर्व्यञ्चितं गुणैः ।।
अन्यद्बुप्तं जातमन्यदित्येतन्नोपपद्यते ।

उप्यते यद्धि यद्बीजं तत्तदेव प्ररोहति ।। ”

मृछकटिके वृक्ष विषये अवदत् च इति यत् –

“ न पर्वताग्रे नलिनी प्ररोहति, न गर्दभा वाजिघुरं वहन्ति ।
यवाः प्रकीर्णा न भवन्ति शालयो, न वेशजाताः शुचयस्तथाऽङ्गना ।। ”

इत्यादयः वहव स्थाने वहव ग्रन्थे वीज, वृक्ष, पादप, मूल, पत्र, गुल्म तथा शाखायां विषये विषदीतया वर्णयत् ।

**उपसंहार -**

वनश्पतये चैतन्यं तथा जीवनं अस्ति इति वर्तमान समये प्रमाणितवन्त स्यु। वनस्पति-चैतन्य विज्ञानस्य कारणात् अद्य संसारे श्रीजगदीशचन्द्र वसुस्य नाम अमर तथा स्वर्णाक्षरे लिपवद्ध ; कारण एतद् महाशय यन्त्र माध्यमेन वनस्पतय मध्ये अपि जीवनशक्ति संञ्चारितवान्। ते अन्य प्राणीवत् अनुकुलित विषये सुखी तथा प्रतिकुल विषये दुःखी स्यात्। पुराणे इति विषये पुर्वतः सुचितवन्त तथा अस्माकम् पूर्व पुरुषाणां वहु प्राचीन समये इत्यस्य ज्ञान लब्धवन्त। पुराणे वृक्ष, लता, गुल्म आदिनां सजीवता विषये पर्याप्त वर्णनं सन्ति। पौराणिक सृष्टि अनुसारं मनुष्ययोनि मध्ये जन्मात् पूर्वं जीवस्य ८४ लक्ष योनिनां मध्ये संञ्चरणं भवेत्। ८४ लक्ष योनि भ्रमणं विना मनुष्य शरीरं लाभ न शक्यते। भारतवर्षे त्रिकालदर्शि महर्षयः स्व योग माध्यमेन समाधिनां युक्तेन सृष्टि विषये ज्ञान प्राप्त्वा लिखितवान् यत् ‘चतुरशीत्तिलक्षान्ते मानवः’ अर्थात् ८४ लक्ष योनि परं दुर्लभ मनुष्य जन्म प्राप्तवन्त। ८४ लक्षात् योनिनां चत्वारः विभाग वर्तते यथा - उद्भिदजः, स्वेदजः, अण्डजः, जरायुजः। उद्भिदजः योनि मध्ये वृक्ष, लता, गुल्म, वनष्पतयः इत्यादयः भवन्ति। स्वेदजः मध्ये कीट, पतंगादि भवन्ति। अण्डजा ये अण्ड मध्यात् जन्म लभन्ति यथा पक्षीणा, सर्पा इत्यादया एवं जरायुजा मध्ये मनुष्या, पशु इत्यादय सन्ति। ‘वृहद्विष्णुपुराणे’ इदं ८४ लक्ष योनि विषये निर्दिष्यन्ते यत् इति –

“स्तावरे लक्षविंशतियो जलजं नवलक्षकम् ।
कृमिजं रुद्रलक्षञ्च पक्षिजं दशलक्षकम् ।।
पश्वादीनां लक्षत्रिंशच्चतुर्लक्षञ्च वानरे ।
ततो हि मानुषा जाताः कुत्सितादेर्वलक्षकम् ।। ”

अर्थात् मनुष्य योनि प्राप्ति पूर्वं जीव २० लक्ष स्थावरः (उद्भिदजः) योनिनां मध्ये जन्म लब्धवान्। ततपरं ११ लक्ष कृमि (स्वेदजः) योनिनां मध्ये जन्मितवान्। ततपरं १९ लक्ष अण्डज योनि मध्ये जन्मलब्ध यत् मध्ये जीव नवलक्षवारं जले उत्पति लव्ध्वा मत्स्य, ग्राह्यादि योनि एवं दशलक्षवारं स्थले उत्पति लव्ध्वा पक्षी योनी मध्ये जन्मलव्धवान्। तदनन्तरं चतुत्रिंशति लक्षवारं जरायुज (पशु, वानर आदि ) योनि मध्ये जन्मलव्धा परं हि जीव मनुष्य योनि प्राप्त। यत् भावेन गंगा नदी गंगोत्री मध्यात् निष्क्रान्ता अवाधित रुपे निम्नाभिमुखी तरंगायित्वा समुद्र मध्ये प्राविशत् तद्वत् परमात्मा तथा परंब्रह्मण अंश स्वरुप इदं जीव परमात्मात् पृथक् भुत्वा सकृत ८४ लक्ष योनि एक अपर शरीर मध्ये भ्रमणं कृत्वा तथा अतिक्रमण कृत्वा अवाध गत्वेन मनुष्य योनि मध्ये प्रविशत्। शम्भुगीताया स्पटतया वर्णितम् यत् –

सरिन्निर्गत्य चिद्रुपा सा महान्द्रेर्जडात्मकात् ।
उद्भिज्जे स्वेदजे चैवमण्डजे च जरायुजे ।।
सलीलं खातरूपेऽलं प्रवहन्ति स्वधाभुजः !
मर्त्यलोकाधित्यकायां निर्वाधं व्रजति स्वयम् ।।

मनुष्य शरीर मध्ये अन्नमय, प्राणमय, मनोमय, विज्ञानमय एवं आनन्दमय इति पंचकोषयः पूर्णविकाश वर्तते यत् फलस्वरुप अस्माकम् सजीवतायाम् अपि पूर्णतया विकाशं परिलभ्यन्ते किन्तु वनष्पतयः मध्ये केवल अन्नमयकोषस्य विकाश वर्तते फलस्वरूप तत् मध्ये तमोमय अज्ञानता प्रभाव अत्यधिकं भवति। यत् प्रभावेन ते चल-प्रचल तथा वागादि

विहीन वर्तते। न हि ते अन्य किञ्चित् कार्य अन्यप्राणीनां वत् कार्य कुर्वन्ति। महर्षि व्यास श्रीमद्भागवत तृतीय स्कन्दे दशम अध्याये प्राकृत एवं वैकृत भेदेन २ प्रकार सर्ग यत् मध्यात् वेकृत सर्गस्य विवरण दत्वा लिखितम् यत् –

सप्तमो मुख्यसर्गस्तु षड्विधः तस्थुषां च यः ।
वनस्पत्योषधिलताः त्वक्सरा विरूधो द्रुमाः ।
उत्स्रोतसस्तमःप्रायाः अन्तःस्पर्शा विशेषिणः ।।

अर्थात् वृक्षादि वनस्पति उर्ध्वं वर्धनशील एवं तमोगुण आधिक्य फलेन मुर्छितवत् सन्ति तथा अन्तरीण भावेन स्पर्शादि गुण अनुभव्यन्ति। अतः तेषाम् चेतनाया किञ्चिदपि सन्देहं नास्ति।

महाभारतस्य शान्तिपर्वे मोक्षद्यम प्रकरण एकादश अध्याये विभिन्न तर्केण प्रमाणयत् यत् वनष्पतयः मनुष्याणां सदृश चेतनवान वभुव। भरद्वाज मुनि महर्षि भृगुं प्रश्नं जिज्ञासा कृतवान् भो भगवन् ! भवान् उक्तवन्त यत् –

“चेष्टा वायुः खमाकाशमूष्माग्निः सलिलं द्रवः ।
पृथिवी चात्र संघातः शरीरं पाञ्चभौतिकम् ।।
इत्येतैः पञ्चभिर्भूतैयुक्तं स्थावरजंगमम् ।
श्रोत्रं घ्राणं रसः स्पर्शो दृष्टिश्चेन्द्रियसंगता ।।
पञ्चभिर्यदि भूतैस्तु युक्ताः स्थावरजंगमाः ।
स्थोवराणां न दृश्यन्ते शरीरे पञ्च धातवः ।।
अनुष्मणामचेष्टानां जडानां चैव सर्वशः ।
वृक्षाणां नोपलभ्यन्ते शरीरे पञ्च धातवः ।।
न श्रृण्वन्ति न पश्यन्ति न गन्धरसवेदिनः ।
न च स्पर्श विजनन्ति ते कथं पाञ्चभौतिकाः ।।
अद्रवत्वाद् अनग्नित्वाद् अभूमित्वाद् अवायुतः ।
आकाशस्याप्रमेयत्वाद्वृक्षाणां नास्ति भौतिकम् ।।”

अर्थात् किद्दश स्थावरः तथा जंगमः पञ्चमहाभुतात् सृष्टं भवति कारण तत्र यत् चेष्टा प्रवहितं स वायु गुण, शुन्यमिति आकाशं, उष्णतामिति अग्नि, रसमिति जलं तथा मांस, मज्जा, अस्थि इत्यादय पृथिवी गुण वर्तते। शरीरात् मध्ये सम्प्रति नासा, कर्ण, जीह्वा, त्वक् तथा नेत्र एतद् पञ्च इन्द्रियाणां क्रमशः पृथिवी, आकाश, जल, वायु तथा अग्नियात् सृष्टि। मनुष्यादि प्रणिनां इत्यस्य स्वतः अनुभुत परं वृक्षादिनां स्थावरे इत्यस्य भावं न दृश्यन्ते। कारणं न ते दर्शनं कुर्वन्ति, न ते श्रवणं कुर्वन्ति, न ते आघ्राणं कुर्वन्ति, न ते रसस्वादं कुर्वन्ति तथा न हि ते स्पर्शादि ज्ञानं प्राप्नुवन्त। तर्हि कथं तेषु पञ्चमहाभुताद् संभूतमिति ज्ञायन्ते ? वृक्षे जलांश न विद्यन्ते इत्यस्य प्रमाण तेषु मध्ये रक्ततुल्य किञ्चिदपि न प्राप्यन्ते। तेषु मध्ये उष्णतामपि न दृश्यन्ते। अतः अग्न्याभावः वर्तते। तेषु मध्ये वायु तथा कठिनत्वात् केनोपि आकाशतत्वापि न प्राप्यन्ते। तर्हि किद्दश ते पञ्चमहाभुतात् सृष्टः इति स्विकृत्यते। महर्षि भृगु प्रत्यत्तरं दत्वा उक्तं च –

“सुखदुःखयोश्च ग्रहणाच्छिन्नस्य च विरोहणात् ।
जीवं पश्यामि वृक्षणामचैतन्यं न विद्यते ।।
घनानापि वृक्षाणामाकाशोऽस्ति न संशयः ।
तेषां पुष्पफले व्यक्तिर्नित्यं समुपपद्यते ।।
उष्मतो म्लायते वर्ण त्वक्फलं पुष्पमेव वा ।
म्लायते चैव शीतेन स्पर्शस्तेनात्र विद्यते ।।

ISSN: 3049-0707 Volume 2 | Issue 1 | (Jan – Mar 2025)

वाय्वभ्राग्निनिष्पेषैः फलं पुष्पं विशीर्यते ।
श्रोत्रेण गृह्यते शब्दः तस्माच्छृण्वन्ति पादपाः ।।
वल्ली वेष्टयते वृक्षं सर्वतशौच गच्छति ।
नाप्यदृष्टेश्च मार्गोऽस्ति तस्मात् पश्यन्ति पादपाः ।।
पुण्यापुण्यैस्तथा गन्धैधुपैश्च विविधैरपि ।
भवन्त्वरोगाः पुष्पाढ्यास्तस्माज्जिघ्रन्ति पादपाः ।।
पादैः सलिलपानाश्च व्याधिनां चापि दर्शनात् ।
व्याधिप्रतिक्रियात्वाच्च विद्यते रसनं द्रुमे ।।
वक्त्रेणोत्पलनालेन यथोर्ध्व जलमाददेत् ।
तथा पवनसंयुक्तः पादैः पिवति पादपः ।।
तेन तज्जलमादत्तं जरयेदग्निमारुतौ ।
आहारपरिणामाच्च स्नेहो वृद्धिश्च जायते ।।
जंगमानां च सर्वेषां शरीरे पञ्च धातवः ।
प्रत्येकशः प्रभिद्यन्ते यैः शरीरं विचेष्टते ।।”

वृक्षेमपि सुख दुःखस्य अनुभवं भवति एवं च यदा ते खण्डित भवन्ति तदा ते पुनः परिवर्धयन्ति। अतः तेषाम् मध्ये जीवनम् सत्ता दृश्यन्ते। काठिन्यात् तथा जटिल टिसु सरंचना परंमपि तेषां मध्ये आकाश भवति कारण आकाशात् विना फल तथा पुष्प सृष्ट्या असंभव वर्तते। वृक्षे अग्नि एव अस्ति कारणं तेषां मध्ये पत्र पक्वन्ति, फलम् वर्धन्ति, तथा वलकल इत्यादय ऋक्ष तथा कठोरतायाम् प्राप्नुवन्ति। वृक्षे स्पर्श शक्तिमेव अस्ति केचित् वृक्षा स्पर्शमात्रेण संकुचित, केचन स्पर्शयित्वा अन्य प्राणिनां शरीरे कण्डु जायते तथा केचन वृक्षा दिव्य सुगन्ध तथा दुर्गन्ध निस्पेषित्वा स्व उपस्तिति प्रदर्शयन्ति। पादपेन दर्शन शक्ति अपि अस्ति यत् माध्यमेन ते उपरि आलोक दिशायां परिवर्ध्यन्ति। अतः पौराणिक प्रमाणेन स्पष्टतया अभिव्यक्त तथा प्रमाणित यत् वृक्षणां मध्ये जीवनम् अस्ति। वृक्षाणां विना प्राणीनां प्राणं धारयतुम् असमर्थ तर्हि एतेषु जीवनस्य रक्षणम् स्वजीवनम् रक्षणतुल्य भवति उक्तं च –

“ पुष्पिताः फलवन्तश्च तर्पयन्तीह मानवान् ।
वृक्षदं पुत्रवत् वृक्षास्तारयन्ति परत्र च ।।
अहो एषां वरं जन्म सर्व प्राण्युपजीवनम् ।
धन्या महीरुहा येभ्यो निराशां यान्ति नार्थिनः ।। ”

**सन्दर्भ ग्रन्थसूची –**


| क्र. सं. | ग्रन्थ नाम | ग्रन्थकाराः | प्रकाशनम् | प्र.वर्षम्/ सं. |
|---|---|---|---|---|
| १ | ईशादि नौ उपानिषद् | | गीताप्रेस, गोरखपुर | संवत् 2053/16 |
| २ | उपनिषदङ्काः | | ,,,, | 2060/10 |
| ३ | ऋगवेद संहिता | | चौ . प्र . दिल्ली | 2011 ( पु . मु . ) |
| ४ | ऐतरेयोपनिषद् | | गीताप्रेस, गोरखपुर | 2060/09 |
| ५ | कठोपनिषद् | | ,,,, | 2060/09 |

| | | | | |
|---|---|---|---|---|
| ६ | छान्दोग्योपनिषद् | | ,,,, | 2069/ 17 |
| ७ | संस्कृतसाहित्य का इतिहास | राधावल्लभ त्रिपाठी | विश्वविद्यालय प्र . वाराणासी | 2001 / 01 |
| ८ | पुराण विमर्श | बलदेव उपाध्याय | चौ . विद्याभवन, वाराणासी | 2021 |